आत्मिकी सम्पद।

अवबोधनम्।

अ. **एकवाक्येन उत्तरत।**

*१. लेरसिया सहाकारिभिः सह **कुत्र** गतः?

उत्तरः लेरसिया सहकारिभिः सह **दरवर्तिनं कञ्चन ग्रामं** गतः।

*२. लेरसियामहोदयेन स्वशरीरे **किं** कृतम्?

उत्तरः लेरसियामहोदयेन स्वशरीरे **कस्याश्चित् ओषधेः अङ्गरसस्य विलेपनं** कृतम्।

*३. ग्रामं प्रविश्य लेरसिया सहकारिणश्च **कुत्र** स्थिताः?

उत्तरः ग्रामं प्रविश्य लेरसिया सहकारिणश्च **मध्यचतुष्पथे मार्गे** स्थिताः।

४. लेरसिया जनानां माहात्म्यं **कथं** निश्चिनोति स्म?

उत्तरः **धनवत्तां दारिद्र्यं वा अगणयित्वा** लेरसिया जनानां **सहृदयतया साधुतया वा तेषां** माहात्म्यं निश्चिनोति स्म।

५. ग्रामप्रवेशात् प्राक् लेरसिया आत्मानं **किं** कृतवान्?

उत्तरः ग्रामप्रवेशात् प्राक् लेरसिया आत्मानं **कशाघातैः व्रणितं** कृतवान्।

६. ओषधेः अङ्गरसस्य विलेपनेन लेरसियामहोदयस्य शरीरं **कथं** समजायत?

उत्तरः ओषधेः अङ्गरसस्य विलेपनेन लेरसियामहोदयस्य शरीरम् **उच्छ्रूनं रूपहीनं रूग्णमिव च दीनं** समजायत।

७. ग्रामवासिनः **किं** जानन्ति स्म?

उत्तरः ग्रामवासिनः **एतावदेव** जानन्ति स्म **यदागताः जनाः ख्यातकीर्तेः लेरसियामहोदयस्य जनपदतः वर्तन्ते।**

८. मिझोजनानां एकस्य गणस्य प्रमुखः **कः** आसीत्?

उत्तरः मिझोजनानां एकस्य गणस्य प्रमुखः **लेरसिया** आसीत्।

९. लेरसिया सर्वैः सह **कथम्** आचरति स्म?

उत्तरः लेरसिया सर्वैः सह **समभावेन** आचरति स्म।

१०. लेरसियामहोदयेन स्वशरीरे **का** लिप्ता?

उत्तरः लेरसियामहोदयेन स्वशरीरे **मृत्तिका** लिप्ता।

११. ते सर्वे **कुत्र** समुपाविशन्?

उत्तरः ते सर्वे **मार्गे** समुपाविशन्।

ब. उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।

*१. सः _____ ग्रामं गतः।
(दूरवर्तिनं / दूरवर्तिनि / दूरवर्ति)

उत्तरः सः **दूरवर्तिनं** ग्रामं गतः।

*२. तस्य शरीरम् उच्छ्वनं _____ च समजायत।
(रूपहीनः / रूपहीनं / रूपहीनस्य)

उत्तरः तस्य शरीरम् उच्छ्वनं **रूपहीनं** च समजायत।

३. सः गणप्रमुखः _____ सह समभावेन आचरति स्म।
(सर्वे / सर्वेषाम् / सर्वैः)

उत्तरः सः गणप्रमुखः **सर्वैः** सह समभावेन आचरति स्म।

४. सः _____ सह दूरवर्तिनं ग्रामं गतः।
(स्वसहकारिणः / स्वसहकारिभिः / स्वसहकारिणाम्)

उत्तरः सः **स्वसहकारिभिः** सह दूरवर्तिनं ग्रामं गतः।

५. _____ प्राक् लेरसिया आत्मानं कशाघातैः व्रणितं कृतवान्। (ग्रामप्रवेशाय / ग्रामप्रवेशस्य / ग्रामप्रवेशात्)

उत्तरः **ग्रामप्रवेशात्** प्राक् लेरसिया आत्मानं कशाघातैः व्रणितं कृतवान्।

क. दत्तं वाक्यं सत्यं वा असत्यम् इति लिखत।

१. सः गणप्रमुखः सर्वैः सह वैरभावेन आचरति स्म।

उत्तरः असत्यम्।

२. लेरसिया जनानां सहृदयतया साधुतया वा तेषां माहात्म्यं निश्चिनोति स्म।

उत्तरः सत्यम्।

३. शरीरस्य उपरि लेरसियामहोदयेन चन्दनमपि लिप्तम्।

उत्तरः असत्यम्।

४. ते सर्वे मार्गे समुपाविशन्।

उत्तरः सत्यम्।

५. ग्रामवासिनः जानन्ति स्म तेषु कतमः लेरसिया इति।

उत्तरः असत्यम्।

ड. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

१. लेरसिया सर्वैः सह समभावेन आचरत् यतः _____
(सर्वे तस्य वयस्याः आसन्। / सः अतीव दयालुः आसीत्।)

उत्तरः लेरसिया सर्वैः सह समभावेन आचरत् यतः **सः अतीव दयालुः आसीत्।**

२. _____ अतः तस्य शरीरमुच्छ्रूनं समजायत।
(लेरसियामहोदयेन अधिकं भोजनं कृत /
लेरसियामहोदयेन ओषधेः विलेपनं स्वशरीरे कृतम्।)

उत्तरः लेरसियामहोदयेन ओषधेः विलेपनं स्वशरीरे कृतं अतः तस्य शरीरमुच्छ्रूनं समजायत।

३. _____ अतः सः दीनतरः अदृश्यत।
(लेरसियामहोदयेन शरीरे मृत्तिका लिप्ता /
लेरसियामहोदयेन किमपि न खदितम्।)

उत्तरः लेरसियामहोदयेन शरीरे मृत्तिका लिप्ता अतः सः दीनतरः अदृश्यत।

माध्यमभाषया उत्तरं लिखत।

१. 'लेरसियामहोदयेन स्वस्य रूपान्तरणं किमर्थं कृतं भवेत्' एतद्विषये माध्यमभाषया स्वमतं लिखत।

उत्तरः 'आत्मिकी सम्पद्' हा पाठ एका मिझो-लोककथेवर आधारित असून 'लौकिक श्रीमंतीपेक्षा मनाची श्रीमंती श्रेष्ठ असते', हे मूल्य यातून स्पष्ट होते. पूर्वी 'मिझोराम' राज्यातील 'मिझो' लोक टोळ्या करून लहान-लहान वसाहतींत राहत असत. लेरसिया अशाच एका टोळीचा प्रमुख होता. तो अतिशय दयाळू होता व सर्वांशी तो समभावाने वागत असे. तो कधीही श्रीमंती किंवा गरिबी पाहून कोणाची पारख करीत नसे तर लोकांचा दयाळूपणा व चांगुलपणा पांहून तो त्यांचे श्रेष्ठत्व ठरवीत असे.

एकदा तो आपल्या सहकाऱ्यांसमवेत दूरवर असलेल्या एका गावात गेला. तो जरी प्रसिद्ध असला तरी तेथे तो यापूर्वी गेला नसल्याने तेथील लोकांनी त्याला कधीही पाहिले नव्हते. तेथील लोकांची परीक्षा घेण्यासाठी त्याने आपले रूप पालटले. गावात शिरण्यापूर्वी लेरसियाने स्वत:ला चाबकाच्या फटकाऱ्यांनी जखमी केले. एका वनस्पतीच्या चिकाचे आपल्या शरीरावर लेपन केले; ज्यामुळे त्याचे शरीर सुजलेले, कुरूप व एखाद्या रोग्यासारखे केविलवाणे झाले. यावर त्याने माती थापली, ज्यामुळे तो अधिकच केविलवाणे दिसू लागला. त्यानंतर तो आपल्या सहकाऱ्यांसह गावात शिरला. अशाप्रकारे त्याने आपले रूप बदलले कारण त्याला ठाऊक होते की असे केल्यावर आपल्याला 'लेरसिया' म्हणून कोणीही ओळखणार नाही आणि 'टोळीप्रमुख' म्हणून कोणी आतिथ्यही करणार नाही. जे खरोखरच दयाळू व सज्जन असतील ते त्याच्याजवळ येतीलच अशाप्रकारे त्याला गावातील खऱ्या सज्जनांचा शोध घ्यावयाचा होता.

पृथक्करणम्।

१. लेरसियामहोदयस्य कृते उपयोजितानि विशेषणानि चित्वा जालरेखाचित्रं पूरयत।

उत्तर: १. दयालु:। २. गणप्रमुख:।
३. ख्यातकीर्त:।

क्रमसंयोजनम्।

१. लेरसियामहोदयस्य कृतिनुसारं वाक्यानि क्रमेण संयोजयत

i. ओषधेः अङ्गरसस्य विलेपनं कृतम्।

ii. आत्मानं कशाघातैः व्रणितं कृतवान्।

iii. ग्रामं प्रविश्य मध्यचतुष्पथं यातः।

iv. तस्योपरि मृत्तिका लिप्ता।

उत्तरः i. आत्मानं कशाघातैः व्रणितं कृतवान्।

ii. ओषधेः अङ्गरसस्य विलेपनं कृतम्।

iii. तस्योपरि मृत्तिका लिप्ता।

iv. ग्रामं प्रविश्य मध्यचतुष्पथं यातः।

२. घटनाक्रमानुसारं संयोजयत।

i. ग्रामं प्रविश्य मध्यचतुष्पथं यातः।

ii. ग्रामप्रवेशात् प्राक् आत्मानं रुग्णमिव दीनं कृतम्।

iii. सर्वे मार्गे समुपाविशन्।

iv. सः स्वसहकारिभिः सह दूरवर्तिनं ग्रामं गतः।

उत्तरः i. सः स्वसहकारिभिः सह दूरवर्तिनं ग्रामं गतः।

ii. ग्रामप्रवेशात् प्राक् आत्मानं रुग्णमिव दीनं कृतम्।

iii. ग्रामं प्रविश्य मध्यचतुष्पथं यातः।

iv. सर्वे मार्गे समुपाविशन्।

शब्दज्ञानम्।

अ. गद्यांशे पर्यायवाचिशब्दं चिनुत।

*१. मानवाः, मनुष्याः, नराः (माणसे) = **जनाः।**

*२. कृपालुः, दयावान् (दयाळू) = **दयालुः।**

३. सङ्घाः, वृन्दाः (गट) = **गणाः।**

४. पुरम्, खेटकम्, जनपदः (गाव) = **ग्रामम्।**

५. महत्ता, महानता, गुरुत्वम् (मोठेपण) = **माहात्म्यम्।**

६. देहः, कायः, तनुः, वपुः = **शरीरम्।**

७. गदार्तः, रोगग्रस्तः, व्याधिग्रस्तः (रोगी) = **रुग्णम्।**

८. पन्थाः, अध्वा, वर्त्म (रस्ता) = **मार्गः।**

ब. गद्यांशे विलोमशब्दं चिनुत।

१. क्रूरः, दुष्टः × **दयालुः।**

२. धनवत्ता × **दारिद्र्यम्।**

३. लघुत्वम् × **माहात्म्यम्।**

४. निष्क्रमणम्, निर्गमनम् × **प्रवेशः।**

५. आयातः × **यातः।**

क. समूहेतरं पदं चिनुत।

१. कृत्वा, प्रविश्य, अगणंयित्वा

उत्तरः प्रविश्य।

२. आसीत्, समुपाविशन्, निश्चिनोति, समजायत

उत्तरः निश्चिनोति।

३. जानाति, निश्चिनोति,आचरति, अदृश्यत

उत्तरः अदृश्यत।

४. लिप्ता, कृतम्, यातः, गतवान्

उत्तरः गतवान्।

५. विलेपनम्, रूपहीनम् , उच्छूनम्, दीनम्

उत्तरः विलेपनम्।

६. प्राक्, यातः परम्, यतः

उत्तरः यातः।

ङ. चतुर्थपदं लिखत।

१. गम् : गतः :: या : _____

उत्तरः गम् : गतः :: या : **यातः**

२. गतः : गतवान् :: कृतः : _____

उत्तरः गतः : गतवान् :: कृतः : **कृतवान्**

३. दीनतरोऽदृश्यत : दीनतरः + अदृश्यत :: कोऽपि: _____

उत्तर: दीनतरोऽदृश्यत : दीनतरः + अदृश्यत :: कोऽपि:

कः + अपि

इ. **धातुसाधित-अव्ययानां चयनम्।**

१. गद्यांशे आगते पूर्वकालवाचक-धातुसाधित-अव्यये चित्वा लिखत।

उत्तर: **त्वान्त-अव्ययम्-**

कृत्वा।

ल्यबन्त-अव्ययम्-

प्रविश्य।

फ. **सन्धिविग्रहं कुरुत।**

*१.	वागणयित्वा	=	**वा + अगणयित्वा।**
*२.	दीनतरोऽदृश्यत	=	**दीनतरः + अदृश्यत।**
३.	शरीरमुच्छ्वसनम्	=	**शरीरम् + उच्छ्वसनम्।**
४.	मृत्तिकापि	=	**मृत्तिका + अपि।**
५.	तेषामेकस्य	=	**तेषाम् + एकस्य।**
६.	एतावदेव	=	**एतावत् +एव ।**

ग. **सन्धिं कुरुत।**

१.	रुग्णम् + इव	=	**रुग्णमिव।**
२.	तस्य + उपरि	=	**तस्योपरि।**
३.	यतः + तस्य	=	**यतस्तस्य।**
४.	यत् + आगताः	=	**यदागताः।**

ह. विशेष्य-विशेषण – अन्विति:।

१. चतुर्थपदं लिखत।

सहृदयता : सहृदयतया :: साधुता : _____

उत्तर: सहृदयता : सहृदयतया :: साधुता : **साधुतया**

२. रिक्तस्थाने उचितं रूपं लिखत।

मृत्तिका लिप्ता।

रस: _____।

औषधं _____।

उत्तर: मृत्तिका लिप्ता।

रस: **लिप्त:**।

औषधं **लिप्तम्**।

३. विशेषण-विशेष्यानां मेलनं कुरुत।

	'अ' गट		'ब' गट
i.	उच्छूनम्	अ.	ग्रामवासिन:
ii.	दयालु:	ब.	शरीरम्
iii.	ख्यातकीर्ते:	क.	गणप्रमुख:
iv.	तत्रस्था:	ड.	लेरसियामहोदयस्य

उत्तर: **i. उच्छूनं शरीरम्।**

ii. दयालु: गणप्रमुख:।

iii. ख्यातकीर्ते: लेरसियामहोदयस्य।

iv. तत्रस्था: ग्रामवासिन:।

अवबोधनम्।

अ. एकवाक्येन उत्तरं लिखत।

*१. ग्रामवासिभिः अतिथयः **कथं** सत्कृताः?

उत्तरः ग्रामवासिभिः अतिथयः **बहुना आतिथ्येन नृत्यगीतवादनैश्च** सत्कृताः।

२. ग्रामवासिभिर्जनैः **के** भोजनार्थमाहूताः?

उत्तरः **लेरसियासहिताः ये अन्ये जनाः आसन् ते** ग्रामवासिभिर्जनैः **स्वगृहं** भोजनार्थमाहूताः।

३. द्वौ भ्रातरौ **कीदृशौ**?

उत्तरः द्वौ भ्रातरौ **अतीव अधनौ परं मनसोदारौ करुणापरौ च।**

४. **कस्य** दर्शनम् अतीव जुगुप्साकरमभद्रं च?

उत्तरः **लेरसियामहोदयस्य** दर्शनम् अतीव जुगुप्साकरमभद्रं च।

५. **केन** सह कश्चन वार्तामपि न करोति?

उत्तरः **लेरसियामहोदयेन** सह कश्चन वार्तामपि न करोति।

ब. उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।

*१. वयं भोजनार्थं किमपि भवते _____ ।

(समर्पयामि / समर्पयामः / समर्पयति)

उत्तरः वयं भोजनार्थं किमपि भवते **समर्पयामः**।

२. ते ग्रामवासिभिर्जनैः _____ भोजनार्थमाहूताः।

(स्वगृहे / स्वगृहात् / स्वगृहं)

उत्तरः ते ग्रामवासिभिर्जनैः **स्वगृहं** भोजनार्थमाहूताः।

३. लेरसिया न केनापि _____ ।

(समाहूतः / समाहूतौ/ समाहूताः)

उत्तरः लेरसिया न केनापि **समाहूतः** ।

४. तस्मिन् जनस्थाने _____ भ्रातरौ न्यवसताम्।

(द्वि/ द्वे / द्वौ)

उत्तरः तस्मिन् जनस्थाने **द्वौ** भ्रातरौ न्यवसताम्।

५. न कश्चन _____ सह वार्तामपि करोति।

(तस्य/ तयोः/ तेन)

उत्तरः न कश्चन **तेन** सह वार्तामपि करोति।

६. तयोरेकः _____ समीपं गत्वाऽवदत्।

(तस्य/ तम् / तस्मात्)

उत्तरः तयोरेकः **तस्य** समीपं गत्वाऽवदत्।

७. वयम्_____ यद् भवानस्माकं जीर्णकुटीमागच्छतु।

(इच्छन्ति/ इच्छामः/ इच्छामि)

उत्तरः वयम् **इच्छामः** यद् भवानस्माकं जीर्णकुटीमागच्छतु।

८. वयं भोजनार्थं किमपि _____ समर्पयामः।

(भवतः/ भवता/ भवते)

उत्तरः वयं भोजनार्थं किमपि **भवते** समर्पयामः।

क. कः कं वदति?

१. "वयं तु अधनाः।"

उत्तरः एकः भ्राता लेरसियामहोदयं वदति।

२. "यत् किमप्यस्मत्सविधे विद्यते तदास्वादयतु।"

उत्तरः एकः भ्राता लेरसियामहोदयं वदति।

ड. सत्यं वा असत्यम् इति लिखत।

१. लेरसिया ग्रामवासिभिर्जनैः स्वगृहं भोजनार्थमाहूतः।

उत्तरः असत्यम्।

२. न कोऽपि लेरसियामहोदयं स्वगृहं नेतुं मनस्यकरोत्।

उत्तरः सत्यम्।

३. द्वौ भ्रातरौ अतीव सधनौ परं मनसौदारौ।

उत्तरः असत्यम्।

४. ग्रामे कश्चिज्जनो जीर्णवस्त्राधानः क्षुत्पीडितः स्थितः।

उत्तरः सत्यम्।

इ. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

१. लेरसिया न केनापि समाहूतः। यतः _____

(कोऽपि तस्य सुहृद् नासीत्।/
अतीव जुगुप्साकरमभद्रं च तस्य दर्शनम्।)

उत्तरः लेरसिया न केनापि समाहूतः। यतः **अतीव जुगुप्साकरमभद्रं च तस्य दर्शनम्।**

२. भ्रातरौ लेरसियामहोदयं निमन्त्रितवन्तौ यतः _____

(तयोः विशालं प्रसादम् आसीत्। /
तौ मनसोदारौ करुणापरौ च आस्ताम्।)

उत्तरः भ्रातरौ लेरसियामहोदयं निमन्त्रितवन्तौ यतः **तौ मनसोदारौ करुणापरौ च आस्ताम्।**

३. भ्रातरौ लेरसियामहोदयाय भोजनं दातुम् असमर्थौ यतः _____

(तौ अधनौ। / तौ साधनौ।)

उत्तरः भ्रातरौ लेरसियामहोदयाय भोजनं दातुम् असमर्थौ यतः **तौ अधनौ।**

माध्यमभाषया स्वमतप्रकटनम्।

१. ग्रामवासिनः लेरसियामहोदयेन सह कीदृशं व्यवहारं कृतवन्तः तद् माध्यमभाषया लिखत।

उत्तर: 'आत्मिकी सम्पद्' हा पाठ एका मिझो-लोककथेवर आधारित असून 'लौकिक श्रीमंतीपेक्षा मनाची श्रीमंती श्रेष्ठ असते' हे मूल्य यांतून स्पष्ट होते. लेरसिया हा गणप्रमुख त्याच्या दयाळूपणा व समभावासाठी प्रसिद्ध होता. दूरवर असलेल्या एका गावातील लोकांच्या दयाळूपणाची परीक्षा घेण्यासाठी त्या गावात शिरण्यापूर्वी त्याने आपले रूप पालटले. तेथील गावकऱ्यांना एवढेच ठाऊक होते की आलेले लोक प्रसिद्ध अशा लेरसिया यांच्या गावातून आले आहेत पण त्यांच्यापैकी 'लेरसिया' कोण हे कोणालाही माहीत नव्हते. लेरसियाबरोबर जे इतर लोक होते; त्यांना गावकऱ्यांनी त्यांपैकीच एकजण 'लेरसिया' असेल या आशेने आपल्या घरी जेवणासाठी बोलविले पुष्कळ पाहुणचार करून आणि नाच-गाणी-वाद्यवादन करून त्यांचे स्वागत केले. परंतु खऱ्या लेरसियाला मात्र कोणीही बोलाविले नाही कारण त्याचे रूप अतिशय किळसवाणे आणि अमंगल होते.

त्या गावात दोन गरीब भाऊ राहत होते. ते निर्धन होते परंतु मनाने उदार व कनवाळू होते. जेव्हा त्यांना समजले की गावात एक अमंगल दिसणारा, फाटके कपडे घातलेला भुकेलेला कोणी एक मनुष्य अन्नाच्या अपेक्षेने थांबला आहे, तेव्हा त्यांना अतिशय दया आली. तेव्हा

कडाक्याची थंडी असलेल्या त्या रात्री त्यांनी लेरसियास शेकोटीची ऊब देऊ केली. तसेच जवळचे जे होते ते रुखेसुखे अन्न खाण्यासाठी देऊ केले. अशाप्रकारे गावकऱ्यांनी लेरसियाला बाह्यरूपावरून तिरस्काराची वागणूक दिली असली तरी त्या दोन भावांनी मात्र लेरसियाचे आतिथ्य केले.

क्रमसंयोजनम्।

१. अधोदत्तानि वाक्यानि क्रमानुसारं संयोजयत।

i. भ्रातृभ्यां लेरसिया स्वगृहम् आहूतः।

ii. लेरसिया न केनापि समाहूतः।

iii. भ्रातृभ्यां लेरसियाविषये ज्ञातम्।

iv. अन्ये जनाः ग्रामवासिभिः स्वगृहम् आहूताः।

उत्तरः i. अन्ये जनाः ग्रामवासिभिः स्वगृहम् आहूताः।

ii. लेरसिया न केनापि समाहूतः।

iii. भ्रातृभ्यां लेरसियाविषये ज्ञातम्।

iv. भ्रातृभ्यां लेरसिया स्वगृहम् आहूतः।

२. घटनाक्रमानुसारं लिखत।

i. ताभ्यां लेरसिया जीर्णकुटीम् आगन्तुं निमन्त्रितः।

ii. जनस्थाने अधनौ मनसोदारौ भ्रातरौ न्यवसताम्।

iii. भ्रातृभ्यां सः किमपि आस्वादयितुं प्रार्थितः।

iv. भ्रातृभ्याम् अभद्ररूपजनस्य विषये ज्ञातम्।

उत्तर: i. जनस्थाने अधनौ मनसोदारौ भ्रातरौ न्यवसताम्।

ii. भ्रातृभ्याम् अभद्ररूपजनस्य विषये ज्ञातम्।

iii. ताभ्यां लेरसिया जीर्णकुटीम् आगन्तुं निमन्त्रितः।

iv. भ्रातृभ्यां सः किमपि आस्वादयितुं प्रार्थितः।

पृथक्करणम्।

योग्यानि विशेषणानि चित्वा जालरेखाचित्रं पूरयत।

(अभद्ररूपः, करुणापरौ, क्षुत्पीडितः, अधनौ, जीर्णवस्त्राधानः,उदारौ, जुगुप्साकरः, द्वौ)



उत्तर: १. अभद्ररूपः। २. क्षुत्पीडितः।

३. जीर्णवस्त्राधानः। ४. जुगुप्साकरः।

५. करुणापरौ। ६. अधनौ।

७. उदारौ। ८. द्वौ।

शब्दज्ञानम्।

अ. गद्यांशे समानार्थकपदं चिनुत।

१. मानवाः, मनुष्याः, नराः (माणसे) = **जनाः।**

२. समीपे, निकटे, निकषा (जवळ) = **समीपम्, सविधे।**

३. बन्धुः, सहोदरः (भाऊ) = **भ्राता।**

४. ग्रामस्थाः, ग्रामीणाः (गावकरी) = **ग्रामवासिनः।**

५. अशुभः, अमङ्गलः, अशिवः (अमंगल) = **अभद्रः।**

६. जनपदः, प्रतिष्ठानम्, नगरम्, ग्रामः (गाव) = **जनस्थानम्।**

७. निर्धनः, दरिद्रः, अकिञ्चनः, दीनः (गरीब) = **अधनः।**

८. कृपालुः, सदयः, दयालुः, दयाशीलः, सानुकम्पः (दयाळू) = **करुणापरः।**

९. बुभुक्षितः, क्षुधार्तः, क्षुधापीडितः, बुभुक्षाग्रस्तः (भुकेलेला) = **क्षुत्पीडितः।**

१०. सम्भाषणम्, आलापः, संवादः, = **वार्ता।**

११. अगदत्, अभणत्, अभाषत (बोलला) = **अवदत्।**

१२. द्रव्यम्, वित्तम्, द्रविणम्, अर्थम् = **धनम्।**

१३. कुटीरः, उटजः, कुटिका (झोपडी) = **कुटी।**

१४. वह्निः, अनलः, पावकः, हुतभुक् (आग) = **अग्निः।**

ब. विलोमपदं चिनुत।

१. परगृहम् (दुसऱ्याचे घर) × **स्वगृहम्।** (स्वत:चे घर)

२. अनाहूत: (न बोलाविलेला) × **आहूत:, समाहूत:।** (बोलाविलेला)

३. भद्रम् (कल्याणकारक) × **अभद्रम्।** (अकल्याणकारक)

४. आनेतुम् (आणण्यासाठी) × **नेतुम्।** (नेण्यासाठी)

५. सधन: (श्रीमंत) × **अधन:।** (गरीब)

६. अनुदार: (स्वार्थी) × **उदार:।** (दयाळू)

७. दूरे, दूरम् × **समीपम्।**

८. शीतता, शैत्यम् (थंडी) × **उष्णता।**

क. समूहेतरं पदं चिनुत।

१. आसन्, अवदत्, न्यवसताम्, करोति

उत्तर: करोति।

२. स्थित: गत्वा, सत्कृता:, आहूता:

उत्तर: गत्वा।

३. अधन:, क्षुत्पीडित:, जीर्णवस्त्राधान:, अभद्ररूप:

उत्तर: अधन:।

४. विद्येते, इच्छामः अकरोत्, समर्पयामः

उत्तरः अकरोत्।

५. अनुभवतु, नेतुम्, आस्वादयतु, आगच्छतु

उत्तरः नेतुम्।

६. स्थितः, आहूताः, ज्ञातम्, अभद्ररूपः

उत्तरः अभद्ररूपः।

७. भवते, सविधे, इति, तथापि

उत्तरः भवते।

ड. **योग्यं चतुर्थपदं लिखत।**

१. कोऽपि : कः + अपि :: एकोऽभद्ररूपः : _____

उत्तरः कोऽपि : कः + अपि :: एकोऽभद्ररूपः : **एकः + अभद्ररूपः**

२. यतोऽतीव : यतः + अतीव :: कोऽपि : _____

उत्तरः यतोऽतीव : यतः + अतीव :: कोऽपि : **कः + अपि**

३. किम् + अपि : किमपि :: वार्ताम् + अपि : _____

उत्तरः किम् + अपि : किमपि :: वार्ताम् + अपि : **वार्तामपि**

४. यद् : ये :: तद् : _____

उत्तरः यद् : ये :: तद् : **ते**

५. आ + गम् : आगच्छतु :: अनु + भू : _____

उत्तरः आ + गम् : आगच्छतु :: अनु + भू : **अनुभवतु**

६. आ + हे : आहूताः :: सत् + कृ : _____

उत्तरः आ + हे : आहूताः :: सत् + कृ : **सत्कृताः**

७. सः : तेन :: कः : _____

उत्तरः सः : तेन :: कः : **केन**

८. केन + अपि : केनापि :: तथा + अपि : _____

उत्तरः केन + अपि : केनापि :: तथा + अपि : **तथापि**

९. अहम् : मम :: वयम् : _____

उत्तरः अहम् : मम :: वयम् : **अस्माकम्**

इ. धातुसाधित-अव्ययानां चयनम्।

१. गद्यांशे आगतं पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्ययं चित्वा लिखत।

उत्तर: गत्वा।

२. गद्यांशे आगतं हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।

उत्तर: नेतुम्।

फ. सन्धिविग्रहं कुरुत।

*१.	कश्चिज्जन:	=	कश्चित् + जन:।
*२.	मनस्यकरोत्	=	मनसि + अकरोत्।
३.	यावतीव	=	यौ + अतीव।
४.	एकोऽभद्ररूप:	=	एक: + अभद्ररूप:।
५.	करोतीति	=	करोति + इति।
६.	तयोरेकस्तस्य	=	तयो: + एक: + तस्य।
७.	गत्वाऽवदत्	=	गत्वा + अवदत्।
८.	अस्माकमेतावदपि	=	अस्माकम् + एतावत् + अपि।
९.	प्रज्वलिताग्नेरुष्णताम्	=	प्रज्वलिताग्ने: + उष्णताम्।
१०.	किमप्यस्मत्सविधे	=	किम् + अपि + अस्मत्सविधे।
११.	तदास्वादयतु	=	तत् + आस्वादयतु।
१२.	येऽन्ये	=	ये + अन्ये।

ग. सन्धिं कुरुत।

१.	ग्रामवासिभि: + जनै:	=	ग्रामवासिभिर्जनै:।
२.	नृत्यगीतवादनै: + च	=	नृत्यगीतवादनैश्च।
३.	यत: + अतीव	=	यतोऽतीव।
४.	न + अस्ति	=	नास्ति।
५.	वयम् + इच्छाम:	=	वयमिच्छाम:।
६.	च + अनुभवतु	=	चानुभवतु।

ह. विशेष्य-विशेषण – अन्विति:।

१. रिक्तस्थानपूर्तिं कुरुत।

i. लेरसिया समाहूत:।

महिला_____

मित्रं _____

उत्तर: लेरसिया समाहूत:।

महिला **समाहूता।**

मित्रं **समाहूतम्।**

ii. द्वौ भ्रातरौ।

_____ भगिन्यौ।

_____ मित्रे।

उत्तर: द्वौ भ्रातरौ।

द्वे भगिन्यौ।

द्वे मित्रे।

iii. जन: क्षुत्पीडित:।

महिला _____।

अपत्यं _____।

उत्तर: जन: क्षुत्पीडित:।

महिला **क्षुत्पीडिता।**

अपत्यं **क्षुत्पीडितम्।**

iv. जीर्णकुटी = जीर्णा कुटी।

जीर्णवस्त्रम् = ___वस्त्रम्।

उत्तर: जीर्णकुटी = जीर्णा कुटी।

जीर्णवस्त्रम् = **जीर्णं** वस्त्रम्।

v. प्रज्वलितः अग्निः।

_____दीपमाला।

उत्तरः प्रज्वलितः अग्निः।

प्रज्वलिता दीपमाला।

२. चतुर्थपदं लिखत।

i. भ्रातरौ : अधनौ :: भ्राता : _____

उत्तरः भ्रातरौ : अधनौ :: भ्राता : **अधनः**

ii. भ्रातरौ : करुणापरौ :: भ्रातरः : _____

उत्तरः भ्रातरौ : करुणापरौ :: भ्रातरः : **करुणापराः**

iii. जनः : जीर्णवस्त्राधानः ::जनाः : _____

उत्तरः जनः : जीर्णवस्त्राधानः ::जनाः : **जीर्णवस्त्राधानाः**

अवबोधनम्।

अ. एकवाक्येन उत्तरं लिखत।

*१. द्वौ भ्रातरौ **कं** गृहं नीतवन्तौ?

उत्तरः द्वौ भ्रातरौ **लेरसियामहोदयं** गृहं नीतवन्तौ।

२. के चकिता लज्जिताश्चभवन्?

उत्तरः **सर्वे ग्रामवासिनः** चकिता लज्जिताश्चाभवन्।

३. केचन धनिकाः **किमर्थं** तां कुटीमधावन्?

उत्तरः केचन धनिकाः **तं जनप्रमुखं स्वगृहं नेतुं** तां कुटीमधावन्।

४. ग्रामवासिभिः **किं** ज्ञातम्?

उत्तरः ग्रामवासिभिः **आत्मिक्याः सम्पदः मूल्यं सामर्थ्यं च** ज्ञातम्।

५. लेरसियामहोदयेन आत्मनः सत्यरूपं **कदा** प्रकटीकृतम्?

उत्तरः लेरसियामहोदयेन आत्मनः सत्यरूपं **प्रत्युषसि** प्रकटीकृतम्।

६. लेरसियाविषये वार्ता **कुत्र** प्रसृता?

उत्तरः लेरसियाविषये वार्ता **ग्रामे** प्रसृता।

७. भ्रात्रोः मार्दवं लेरसिया **कैः** सम्मानितवान्?

उत्तरः भ्रात्रोः मार्दवं लेरसिया **पारितोषिकैः** सम्मानितवान्।

८. ग्रामवासिजनाः भातृभ्यां सह **कथं** व्यवहरन्ति स्म?

उत्तरः ग्रामवासिजनाः भातृभ्यां सह **सादरम्** व्यवहरन्ति स्म।

ब. मञ्जूषातः उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।

*१. _____ सह कुटीं गत्वा रात्रिमयापयत्।

(भ्रातृभ्यां / भ्रात्रोः / भ्रातृन्)

उत्तरः **भ्रातृभ्यां** सह कुटीं गत्वा रात्रिमयापयत्।

*२. एष महाजनः नास्माभिः _____।

(विज्ञातः/ विज्ञातम् / विज्ञातवान्)

उत्तरः एष महाजनः नास्माभिः **विज्ञातः।**

३. _____साकं रूक्षमन्नमपि तेन सानन्दं भक्षितम्।

(तयोः / तौ / ताभ्यां)

उत्तरः **ताभ्यां** साकं रूक्षमन्नमपि तेन सानन्दं भक्षितम्।

४. _____सह शिष्टसम्मतः आचारोऽपि न कृतः।

(तस्मै / तेन / तस्य)

उत्तरः **तेन** सह शिष्टसम्मतः आचारोऽपि न कृतः।

५. तौ अधनौ किन्तु तयोः _____उदारे।

(मनसी / मनसि / मनांसि)

उत्तरः तौ अधनौ किन्तु तयोः **मनसी** उदारे।

क. कः कं वदति?

१. 'तावेव मम मित्रे।'

उत्तरः लेरसियामहोदयः ग्रामवासिनः वदति।

२. 'ताभ्यां मह्यं सत्कारः प्रतिपादितः।'

उत्तरः लेरसिया ग्रामवासिनः जनान् वदति।

३. 'एषैव तयोः आत्मिकी सम्पद्।'

उत्तरः लेरसियामहोदयः ग्रामवासिनः वदति।

ड. दत्तम् वाक्यं सत्यं वा असत्यम् इति लिखत।

१. लेरसिया भ्रातृभ्यां सह कुटीं गत्वा रात्रिमयापयत्।

उत्तरः सत्यम्।

२. ताभ्यां सह मिष्टान्नं तेन भक्षितम्।

उत्तरः असत्यम्।

३. रात्रौ तेन आत्मपरिचयः तयोः कारितः।

उत्तरः असत्यम्।

४. तौ त्यक्त्वा स नान्यत्र गतः।

उत्तरः सत्यम्।

५. लेरसिया तयोः मार्दवं पारितोषिकैः निन्दितवान्।

उत्तरः असत्यम्।

इ. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

१. ग्रामवासिनः लज्जिताः यतः _____

(लेरसियामहोदयं विज्ञातुं ते असमर्थाः। / लेरसिया भातृभ्यां सह रात्रिमयापयत्।)

उत्तरः ग्रामवासिनः लज्जिताः यतः **लेरसियामहोदयं विज्ञातुं ते असमर्थाः।**

२. _____ धनिकाः तां कुटीमधावन्।

(सूर्यात् स्वसंरक्षणं कर्तुम् / जनप्रमुखं स्वगृहं नेतुम्)

उत्तरः **जनप्रमुखं स्वगृहं नेतुं** धनिकाः तां कुटीमधावन्।

३. भ्रातरौ एव मम मित्रे इति लेरसिया अकथयम् यतः _____

(अपरिचितौ अपि ताभ्यां लेरसियामहोदयाय सत्कारः प्रतिपादितः। / सः तौ जानाति स्म।)

उत्तरः भ्रातरौ एव मम मित्रे इति लेरसिया अकथयम् यतः **अपरिचितौ अपि ताभ्यां लेरसियामहोदयाय सत्कारः प्रतिपादितः।**

४. ग्रामवासिजनाः भातृभ्यां सह सादरं व्यवहरन्ति स्म। यतः _____

(तैः आत्मिक्याः सम्पदः मूल्यं ज्ञातम्। / तौ लेरसियामहोदयस्य जनपदस्थानं गतौ।)

उत्तरः ग्रामवासिजनाः भातृभ्यां सह सादरं व्यवहरन्ति स्म। यतः **तैः आत्मिक्याः सम्पदः मूल्यं ज्ञातम्।**

माध्यमभाषया स्वमतप्रकटनम्।

१. भ्रातरौ प्रति लेरसियामहोदयस्य व्यवहारविषये भवतः किं मतम्? माध्यमभाषया स्पष्टीकुरुत।

उत्तरः 'आत्मिकी सम्पद' हा पाठ एका मिझो-लोककथेवर आधारित असून 'लौकिक श्रीमंतीपेक्षा मनाची श्रीमंती श्रेष्ठ असते' हे मूल्य यातून स्पष्ट होते.

दोन गरीब भावांच्या बोलाविण्यावरून लेरसिया केवळ त्यांच्या जीर्ण झोपडीतच गेला नाही; तर त्याने ती रात्र दोन भाग्र्यांसोबतच घालविली. त्यांनी दिलेले कोरडे

अन्नही सेवन केले. दुसऱ्या दिवशी त्याने आपले खरे रूप उघड करून त्या दोघांना आपली ओळख करून दिली. जेव्हा हे वृत्त गावात पसरले तेव्हा सर्व गावकरी लेरसियाला आपण ओळखू शकलो नाही, या भावनेने शरमिंदे झाले. काही धनिक तर लेरसियाला घरी घेऊन येण्यासाठी झोपडीकडे धावले परंतु लेरसियाने ते घर सोडण्यास नकार दिला. 'ज्यांनी आपण वेष पालटला असतानाही माझा पाहुणचार केला तेच दोघे माझे खरे मित्र' हे त्याने स्पष्ट सांगितले. खरी ओळख नसूनही त्या दोन भावांनी लेरसियाचे आतिथ्य केले. लेरसिया नेहमीच लोकांच्या दयाभावावरून व चांगुलपणावरून पारख करत असल्याने तो या दोन भावाच्या वर्तणुकीने हेलावला.

आपल्या गावी परतल्यावर लेरसियाने दोघा भावांना गावी येण्याचे आमंत्रणपत्र पाठविले. जेव्हा ते दोघे तेथे पोहोचले, तेव्हा लेरसियाने त्यांचे जंगी स्वागत केले. अनेक प्रकारच्या भेटवस्तू, बैलासारखे दिसणारे अनेक 'मिठून' नावाचे प्राणी त्याला भेट म्हणून दिले. या प्राण्यांची मालकी असणे हे ईशान्य भारतातील पहाडी प्रांतात श्रीमंतीचे लक्षण मानले जाते. अशाप्रकारे ते गरीब भाऊ श्रीमंत झाले. व गावकरीही त्यांच्याशी आदराने वागू लागले.

अशाप्रकारे लेरसियाने संपत्तीचा वर्षाव करून त्या दोन्ही भावांच्या आंतरिक श्रीमंतीचा सन्मान केला.

पृथक्करणम्।

१. उचितानि विशेषणानि चित्वा जालरेखाचित्रं पूरयत।
आढ्यौ, लज्जिताः, प्रमुखः, चकिताः, उदारौ, मोदमानः,
अधनौ, महाजनः, खिन्नाः



उत्तरः १. प्रमुखः। २. मोदमानः।
३. महाजनः। ४. लज्जिताः।
५. चकिताः। ६. खिन्नाः।
७. आढ्यौ। ८. उदारौ।
९. अधनौ।

क्रमसंयोजनम्।

१. क्रमानुसारं संयोजयत।

i. धनिका: कुटीमधावन्।

ii. भ्रातरौ लेरसियामहोदयस्य जनपदस्थानं गतौ।

iii. लेरसिया कुटीं गत्वा मोदमान: रात्रिमयापयत्।

iv. लेरसिया तयो: मार्दवं परितोषिकै: सम्मानितवान्।

उत्तर: i. लेरसिया कुटीं गत्वा मोदमान: रात्रिमयापयत्।

ii. धनिका: कुटीमधावन्।

iii. भ्रातरौ लेरसियामहोदयस्य जनपदस्थानं गतौ।

iv. लेरसिया तयो: मार्दवं परितोषिकै: सम्मानितवान्।

२. लेरसियामहोदयस्य व्यवहारं क्रमानुसारं लिखत।

i. प्रत्युषसि आत्मपरिचयं कारितवान्।

ii. रूक्षमन्नमपि सानन्दं भक्षितवान्।

iii. कुटीं गत्वा मोदमान: रात्रिमयापयत्।

iv. भ्रातरौ त्यक्त्वा नान्यत्र गत:।

उत्तर:

i. कुटीं गत्वा मोदमान: रात्रिमयापयत्।

ii. रूक्षमन्नमपि सानन्दं भक्षितवान्।

iii. प्रत्युषसि आत्मपरिचयं कारितवान्।

iv. भ्रातरौ त्यक्त्वा नान्यत्र गत:।

३. घटनाक्रमानुसारं पुनर्लिखत।

i. ग्रामवासिजना: ताभ्यां सह सादरं व्यवहरन्ति स्म।

ii. ग्रामवासिन: खिन्ना: जाता:।

iii. लेरसिया ताभ्याम् उपायनीकृतवान्।

iv. लेरसियामहोदयेन आत्मपरिचय: कारित:।

उत्तर: i. लेरसियामहोदयेन आत्मपरिचय: कारित:।

ii. ग्रामवासिन: खिन्ना: जाता:।

iii. लेरसिया ताभ्याम् उपायनीकृतवान्।

iv. ग्रामवासिजना: ताभ्यां सह सादरं व्यवहरन्ति स्म।

शब्दज्ञानम्।

अ. गद्यांशे समानार्थकपदं चित्वा लिखत।

*१. व्रीडिता:, ह्रेपिता, सत्रपा: (शरमिंदा) = **लज्जिता:।**

*२. व्यवहार:, आचरणम् (वर्तन) = **आचार:।**

*३. दु:खिता:, व्यथिता:, विषण्णा: (दु:खी) = **खिन्ना:।**

*४. बन्धु:, सहोदर:, सोदर: (भाऊ) = **भ्राता।**

५. कुटीर:, उटज:, कुटिका (झोपडी) = **कुटी।**

६. रजनी, निशा, त्रियामा, क्षपा (रात्र) = **रात्रि:।**

७. सहर्षम्, समोदम् (आनंदाने) = **सानन्दम्।**

८. प्रभाते, प्रात:काले (सकाळी) = **प्रत्युषसि।**

९. वृत्तम्, वृत्तान्त:, समाचार:, सन्देश:(बातमी) = **वार्ता।**

१०. धनवन्तः, सधनाः, इभ्याः (श्रीमंत) = **धनिकाः, आढ्याः।**

११. वयस्यः, सखा, सुहृद (मित्र) = **मित्रम्।**

१२. सम्पत्तिः, श्रीः, लक्ष्मीः, विभवः (धन) = **सम्पद्।**

१३. उपायनम्, पारितोषिकम् (भेटवस्तू) = **उपहारः।**

१४. सार्धम्, समम् (बरोबर) = **सह, साकम्।**

ब. परिच्छेदे प्रयुक्तं विपरितार्थकशब्दं लिखत।

*१. खेदः, दुःखम् × **मोदः।** (आनंद)

*२. काठिन्यम् × **मार्दवम्।**

*३. सधनः, धनिकः, आढ्यः × **अधनः।**

*४. चिरेण, विलम्बेन × **अचिरात्।**

५. सखेदम्, सशोकम् × **सानन्दम्।**

६. आनन्दिताः, सन्तुष्टाः × **खिन्नाः।**

७. शत्रुः, अरिः, रिपुः × **मित्रम्।**

८. अनुदारः × **उदारः।**

क. भिन्नार्थकशब्दानां ज्ञानम्।

योग्यम् अर्थं चित्वा रिक्तस्थाने पूरयत।
(सूर्यः, वयस्यः)

i. 'तावेव मम मित्रे' इत्यत्र 'मित्रं' नाम _____।

ii. 'मित्रः प्रातः गगने उदयति' इत्यत्र 'मित्रः'नाम _____।

उत्तरः i. 'तावेव मम मित्रे' इत्यत्र 'मित्रं' नाम **वयस्यः।**

ii. 'मित्रः प्रातः गगने उदयति' इत्यत्र 'मित्रः'नाम **सूर्यः।**

ड. समूहेतरं पदं चिनुत।

१. खिन्नाः, आत्मिक्याः, लज्जिताः, चकिताः

उत्तरः आत्मिक्याः।

२. अकथयत्, अधावन्, अनन्तरम्, अयापयत्

उत्तरः अनन्तरम्।

३. त्यक्त्वा, गत्वा, उक्त्वा, वीक्ष्य

उत्तरः वीक्ष्य।

४. सम्मानितवान्, प्रसृता, प्रतिपादितः, कारितः

उत्तरः सम्मानितवान्।

५. सञ्जातौ, समर्पयामास, ज्ञातम्, भक्षितम्

उत्तरः समर्पयामास।

६. परम्, तम्, साकम्, इत्थम्

उत्तरः तम्।

७. महाजनः, मिठुनप्राणिनः, आत्मनः, ग्रामवासिनः

उत्तरः महाजनः।

इ. **चतुर्थपदं लिखत।**

१. जनप्रमुखम् : तम् :: कुटीम् : _____

उत्तर: जनप्रमुखम् : तम् :: कुटीम् : **ताम्**

२. आचार: + अपि : आचारोऽपि :: परिचय: + अपि : _____

उत्तर: आचार: + अपि : आचारोऽपि :: परिचय: + अपि : **परिचयोऽपि**

३. स: : गत: :: तौ : _____

उत्तर: स: : गत: :: तौ : **गतौ**

४. धनिका: : ग्रामवासिन: ::अधनौ : _____

उत्तर: धनिका: : ग्रामवासिन: ::अधनौ : **भ्रातरौ**

फ. **धातुसाधित-अव्ययानां चयनम्।**

१. **गद्यांशे आगतानि पूर्वकालवाचक-धातुसाधित-अव्ययानि चित्वा लिखत।**

उत्तर: **त्वान्त-अव्यये-**

i. उक्त्वा। ii. गत्वा।

ल्यबन्त-अव्यये-

i. प्रकटीकृत्य। ii. वीक्ष्य।

२. **गद्यांशे आगतं हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।**

उत्तर: नेतुम्।

ग. **सन्धिविग्रहं कुरुत।**

*१.	अचिरादेवैषा	=	**अचिरात् + एव + एषा।**
*२.	लज्जिताश्चाभवन्	=	**लज्जिताः + च + अभवन्।**
*३.	रात्रिमयापयत्	=	**रात्रिम् + अयापयत्।**
*४.	तथेत्युक्त्वा	=	**तथा + इति + उक्त्वा।**
*५.	आत्मपरिचयस्तयोः	=	**आत्मपरिचयः + तयोः।**
*६.	तयोर्मार्दवम्	=	**तयोः + मार्दवम्।**
७.	नान्यत्र	=	**न + अन्यत्र।**
८.	एषैव	=	**एषा + एव।**
९.	प्रमुखस्ताभ्याम्	=	**प्रमुखः + ताभ्याम्।**
१०.	ताभ्यामुपायनीकृतवान्	=	**ताभ्याम् + उपायनीकृतवान्।**
११.	रूक्षमन्नमपि	=	**रूक्षम् + अन्नम्।**
१२.	तैरपि	=	**तैः + अपि।**

ह. **सन्धिं कुरुत।**

*१.	न + अस्माभिः + विज्ञातः	=	**नास्माभिर्विज्ञातः।**
२.	तेन + आत्मानः	=	**तेनात्मानः।**
३.	तौ + एव	=	**तावेव।**
४.	सः + अकथयत्	=	**सोऽकथयत् ।**
५.	ज्ञातम् + अधुना	=	**ज्ञातमधुना।**

ई. विशेष्य-विशेषण – अन्विति:।

१. गद्यांशे आगतानि विशेष्याणि चित्वा लिखत।

i. रूक्षम् _____।

उत्तर: रूक्षम् **अन्नम्।**

ii. शिष्टसम्मत: _____।

उत्तर: शिष्टसम्मत: **आचार:।**

iii. चकिता: _____।

उत्तर: चकिता: **ग्रामवासिन:।**

iv. उदारे _____।

उत्तर: उदारे **मनसी।**

२. गद्यांशे आगतानि विशेषणानि चिनुत।

i. _____,_____आचार:।

उत्तर: शिष्टसम्मत:, मानुष: आचार:।

ii. _____सम्पद्।

उत्तर: आत्मिकी सम्पद्।

iii. _____ स्वागतम्।

उत्तर: महत् स्वागतम्।

iv. _____उपहारा:।

उत्तर: नैकप्रकारा: उपहारा:।

सूचनानुसारं वाक्यपरिवर्तनं कुरुत।

*१. लेरसिया न केनापि समाहूतः। ('लेरसिया'इति पदस्य स्थाने 'जनाः' प्रयुज्य वाक्यं पुनर्लिखत।)

उत्तर: जनाः न केनापि **समाहूताः।**

स्पष्टीकरण – **लेरसिया** कर्ता प्रथमा एकवचनी त्याऐवजी **जनाः** हा कर्ता तृतीयपुरुषी प्रथमा बहुवचनी

∴ 'समाहूतः' (पुंलिंगी प्रथमा एकवचन) या कर्मणि भूतकालवाचक धातुसाधित विशेषणाचे 'समाहूताः' (पुंलिंगी प्रथमा बहुवचन) करावे.

*२. जनाः चकिताः अभवन्। (एकवचने लिखत।)

उत्तर: जनः चकितः अभवत्।

कर्ता कर्तुःविशेषणम्

स्पष्टीकरण – जनाः चकिताः अभवन्। कर्ता व क्रियापदम् तृतीयपुरुषः बहुवचनम्.

जनः चकितः अभवत्। कर्ता व क्रियापदम् तृतीयपुरुषः एकवचनम्.

कर्ता क्रियापदम्

– कर्त्याचे विशेषणही बहुवचनातून एकवचनात बदलावे.

*३. (ग्रामप्रवेश) प्राक् लेरसिया आत्मानं व्रणितं कृतवान्। (मञ्जूषायां दत्तस्य शब्दस्य योग्यं रूपं प्रयोजयत।)

उत्तर: ग्रामप्रवेशात् प्राक् लेरसिया आत्मानं व्रणितं कृतवान्।

स्पष्टीकरण – 'प्राक्' या अव्ययास पञ्चमीची अपेक्षा असते.

*४. अन्ये जना (ग्रामवासिन्) भोजनार्थम् आहूता:। (योग्यां विभक्तिं प्रयोजयत।)

उत्तर: अन्ये जना **ग्रामवासिभि:** भोजनार्थम् आहूता:।

स्पष्टीकरण – कर्मणि प्रयोगात कर्ता तृतीयेत योजावा.
पाठातील संदर्भानुसार तृतीया बहुवचन योजावे.

*५. एक: तस्य समीपं (गम्) अवदत्। (पूर्वकालवाचकं योजयत।)

उत्तर: एक: तस्य समीपं **गत्वा** अवदत्।

*६. भवान् अस्माकं जीर्णकुटीम् आगच्छतु। ('भवान्'इति पदस्य स्थाने 'त्वम्' प्रयोजयत।)

उत्तर: **त्वम्** अस्माकं जीर्णकुटीम् **आगच्छ।**

स्पष्टीकरण – 'भवान्' या सर्वनामास तृतीय पुरुषी एकवचनी क्रियापदाची अपेक्षा.
'त्वम्' या सर्वनामास द्वितीय पुरुषी एकवचनी क्रियापदाची अपेक्षा.
येथे क्रियापद आज्ञार्थी आहे हे लक्षात घ्यावे.

*७. तै: ज्ञातम् आत्मिक्या: सम्पद: मूल्यम्। (प्रयोगपरिवर्तनं कुरुत।)

उत्तर: **ते ज्ञातवन्त:** आत्मिक्या: सम्पद: **मूल्यम्।**

स्पष्टीकरण –

कर्ता	कर्मणि-भू-धा-वि			कर्म	=	कर्मणि-प्रयोग:
३	१			१		
तै:	ज्ञातम्	आत्मिक्या:	सम्पद:	मूल्यम्।		
↓	↓	बदलत नाही	बदलत नाही	↓		
ते	ज्ञातवन्त:	आत्मिक्या:	सम्पद:	मूल्यम्।		
१	१			२		
कर्ता	कर्तरि -भू-धा-वि			कर्म	=	कर्तरि-प्रयोग:

*८. लेरसिया रात्रिमयापयत्। (प्रयोजकं निष्कासयत।)

उत्तर: रात्रि: अयात्।

स्पष्टीकरण – प्रयोजक कर्ता काढा.

वाक्यातील मूळ कर्ता प्रथमेत योजा – रात्रि : – प्रथमा

क्रियापदातील काळ / अर्थ तसाच ठेवून कर्त्याप्रमाणे त्याच्या पुरुष-वचनात बदल करा.



९. गणप्रमुख: समभावेन आचरति स्म। ('स्म'निष्कासयत।)

उत्तर: गणप्रमुख: समभावेन **आचरत्।**

स्पष्टीकरण – वर्तमानकाळी क्रियापद + स्म = भूतकाळ

∴ आचरति + स्म = भूतकाळ

याऐवजी **'आ + चर्'** (१ परस्मैपद) प्रथम भूतकाळ

वाक्याचा कर्ता 'गणप्रमुख:' तृतीय पुरुष एकवचन असल्याने ते योग्य ठरते.

१०. सः तेषां माहात्म्यं निश्चिनोति स्म। ('स्म'निष्कासयत।)

उत्तर: सः तेषां माहात्म्यं **निसचिनोत्।**

स्पष्टीकरण – वर्तमानकाळी क्रियापद + स्म = प्रथम भूतकाळ

∴ निश्चिनोति + स्म = प्रथम भूतकाळ.

म्हणून याऐवजी **'निस् + चि'** (५ उभयपद येथे परस्मैपद)

या धातूचे प्रथम भूतकाळी तृतीय पुरुष एकवचन रूप योजावे.

वाक्याचा कर्ता – 'सः' तृतीय पुरुष एकवचन असल्याने ते योग्य ठरते.

११. एकः तस्य समीपं गत्वाऽवदत्। (पूर्वकालवाचकं निष्कासयत।)

उत्तर: एकः तस्य समीपम् **अगच्छत्** अवदत् **च।**

स्पष्टीकरण – वाक्यातील पूर्वकालवाचक अव्यय ओळखा – गत्वा – गम् → गच्छ (१ परस्मैपद)

मुख्य क्रियापद 'अवदत्' – प्रथम भूतकाळ तृतीय पुरुष एकवचन आहे.

∴ गम् → गच्छ् (१ परस्मैपद) प्रथम भूतकाळ तृतीय पुरुष एकवचन – अगच्छत्

वाक्याच्या शेवटी दोन वाक्य जोडणारे 'च' हे अव्यय योजावे.